# कारकम्

## ( सामान्यपरिचयः )

सामान्यतः षट्कारकाणि भवन्ति। यथा-

**कर्त्ता कर्म च करणं सम्प्रदानं तथैव च।**
**अपादानाधिकरणम् इत्याहुः कारकाणि षट्॥**

| | | |
|---|---|---|
| (*i*) कर्त्तृकारकम् | (*ii*) कर्मकारकम् | (*iii*) करणकारकम् |
| (*iv*) सम्प्रदानकारकम् | (*v*) अपादानकारकम् | (*vi*) अधिकरणकारकम् |

**कर्त्तृकारकम्** - स्वतन्त्रः कर्त्ता। क्रियायां यः स्वतन्त्रः प्रधानो वा भवति सः कर्त्ता। यथा-रामः ग्रामं गच्छति। अत्र गमनक्रियायां रामः स्वतन्त्रः वर्तते, अतः सः कर्त्तृकारकम् अस्ति। वाक्ये मुख्ये कर्तरि प्रथमा, गौणे कर्तरि च तृतीया विभक्तिः भवति। यथा-

(क) रामः ग्रामं गच्छति।

(ख) रामेण ग्रामः गम्यते।

**कर्मकारकम्** - कर्त्तुरीप्सिततमं कर्म। कर्त्ता स्वक्रियया यम् अर्थम् अतिशयेन प्राप्तुम् इच्छति तत् कर्म भवति। यथा-बालकः विद्यालयं गच्छति। अत्र वाक्ये बालकः कर्त्ता भवति, गमनक्रियया विद्यालयः तस्य ईप्सिततमं वर्तते, अतः विद्यालय इति कर्मकारकं वर्तते, कर्मणि द्वितीया विभक्तिः, (कर्मवाच्ये) मुख्ये च प्रथमा विभक्तिः भवति, यथा-

(क) बालकः विद्यालयं गच्छति।

(ख) बालकेन विद्यालयः गम्यते।

**करणकारकम्** - साधकतमं करणम्। क्रियासिद्धौ यत् अतिशयेन सहायकं भवति, तत् करणं भवति, यथा-श्यामः कलमेन लिखति। अत्र कर्त्तुः श्यामस्य लेखनक्रियायां कलमः अतिशयेन सहायकः, अतः कलम इति करणकारकं भवति। करणे तृतीया-विभक्तिः भवति।

**सम्प्रदानकारकम्** - कर्मणा यमभिप्रैति स सम्प्रदानम्। कर्त्ता दानक्रियया यं सम्बद्धुम् इच्छति, तत् सम्प्रदानं भवति। यथा-देवदत्तः भिक्षुकाय भिक्षां ददाति। अत्र कर्त्ता देवदत्तः

दानक्रियया भिक्षुकम् अभिप्रैति = सम्बद्धुम् इच्छति। अतः भिक्षुकपदं सम्प्रदानकारकम्। सम्प्रदाने चतुर्थी-विभक्तिः भवति।

**अपादानकारकम्** - ध्रुवमपायेऽपादानम्। अपाये = विभागे, यत् ध्रुवम् = अवधिभूतम् तत् अपादानं भवति, यथा- <u>वृक्षात्</u> फलं पतति। अत्र फलस्य विभागः वृक्षात् भवति, अतः वृक्षः ध्रुवः इति अपादानकारकम्। अपादाने पञ्चमी-विभक्तिः भवति।

**अधिकरणकारकम्** - आधारोऽधिकरणम्। कर्तृकर्मनिष्ठक्रियायाः आधारभूतं यत् वर्तते, तत् अधिकरणं भवति, यथा- <u>विद्यालये</u> छात्राः पठन्ति। अत्र कर्त्तुः पठनक्रियायाः आधारः विद्यालयः अधिकरणकारकम्। अधिकरणे सप्तमी-विभक्तिः भवति।

## उपपदविभक्तिः

पदम् आश्रित्य या विभक्तिः सा उपपदविभक्तिः। यथा-

| | | |
|---|---|---|
| **उभयतः** | = | दोनों तरफ (द्वितीया) **नदीम्** उभयतः वृक्षाः सन्ति। |
| **परितः** | = | चारों तरफ (द्वितीया) **विद्यालयं** परितः प्राचीरम् अस्ति। |
| **सर्वतः** | = | सभी तरफ (द्वितीया) **ग्रामं** सर्वतः कृषिक्षेत्राणि सन्ति। |
| **प्रति** | = | की ओर (द्वितीया) छात्रः **विद्यालयं** प्रति गच्छति। |
| **निकषा** | = | समीप में (द्वितीया) **विद्यालयं** निकषा उद्यानम् अस्ति। |
| **धिक्** | = | निन्दा (द्वितीया) **मूर्खं** धिक्। |
| **सह** | = | सहित (तृतीया) बालिका **बालकेन** सह खेलति। |
| **विना** | = | अतिरिक्त (तृतीया/पञ्चमी/द्वितीया) **ज्ञानेन** विना जीवनं वृथा। |
| **अलम्** | = | वारण (तृतीया) **विवादेन** अलम्। |
| | | समर्थ (चतुर्थी) मल्लः **मल्लाय** अलम्। |
| **नमः** | = | नमस्कार (चतुर्थी) **पितृदेवाय** नमः। |
| **बहिः** | = | बाहर (पञ्चमी) **विद्यालयात्** बहिः बालकाः खेलन्ति। |
| **उपरि** | = | ऊपर (षष्ठी) **वृक्षस्य** उपरि मर्कटाः क्रीडन्ति। |
| **अधः** | = | नीचे (षष्ठी) **वृक्षस्य** अधः पथिकः उपविशति। |
| **अन्तः** | = | भीतर (षष्ठी) **विद्यालयस्य** अन्तः छात्राः पठन्ति। |